Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

# ॥ श्रीशीलप्रकाशः ॥

( कर्ता श्रीपद्मसागरगणी )

छपावी प्रसिद्ध करनार

पंडित श्रावक हीरालाल हंसराज. ( जामनगरवाळा )

वीरसंवत्—२४३७. विक्रमसंवत्—१९६७. सने १९११

किं रु. ०–१२–०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जामनगर श्रीजैनभास्करोदयछापखानामां छप्युं.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीजिनाय नमः ॥

# ॥ अथ श्रीशीलप्रकाशः प्रारभ्यते ॥

( कर्ता श्रीपद्मसागरगणी )

छपावी प्रसिद्ध करनार पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

तन्याद्धन्यार्चितांह्रिः प्रथमजिनपतिर्भद्रमुन्निद्रनेत्र—श्चक्रे येन त्रिलोकी निजवचनसुधापानतः शांतचित्ता ॥ श्रीशांतिः शांतिगेहं शमयतु दुरितं युष्मदीयं समस्तं । यो मेने प्राग्भवे स्वं तृणमिव सधनं देहमेकांगिरक्षः ॥ १ ॥ श्रीनेमिस्तीर्थभर्ता भवतु भवभृतां कल्मषव्रातहर्ता । यस्तत्याज स्वरागां कृतसकृपमना निःस्पृहः कांतकांतां ॥ पार्श्वे वः पार्श्वनाथोऽप्यविकलकमलां प्रापयत्वस्तविघ्नः । प्राप्तो यस्य प्रभावात्सुरपतिपदवीं दग्धदेहोऽपि सर्पः ॥ २ ॥ श्रीमद्वीरश्छिनत्तु प्रकटतममहामोहपाशं दृढं नः । पादांगु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्टोऽपि मेरौ पवन इव दले यस्य चक्रे प्रकंपं ॥ जाड्यच्छेदं मतेर्नः सकलकविहिता जा-
रती सा विदध्या—द्या हंसं पुष्पमाला हृदयमिव गता श्रीकरंभं करोति ॥ ३ ॥ अन-
न्यसाधारणधैर्यमुख्य—गुणव्रजश्रीजिनराजपादान् ॥ प्रणम्य संस्मृत्य च शारदांह्री । शी-
लप्रकाशः प्रथितः प्रकाश्यते ॥ ४ ॥ एको यथा निर्मलकांतिरर्क—स्तमोभरं हंत्यखिलं
जगत्यां ॥ वीरोऽथवा दुर्धरवैरिवृंदं । समुद्यतं विग्रहविग्रहाय ॥ ५ ॥ सिंहो यथा वारण-
चक्रवालं । जयत्यलं वीतसहायकोऽपि ॥ तथैकमप्यस्तमलं हि शीलं । समस्तकार्याणि
करोति किं न ॥ ६ ॥ युग्मं ॥ शीलं विपद्दुस्तरवारिनाथ—निमज्जदंगिव्रजनव्यपोतं ॥
शीलं सतां मुक्तिवधूविलासे । साधारणं कारणमादृतं सत ॥ ७ ॥ शीलं भवेऽत्रापि य-
शोविनोद—प्रमोदसंतोषविधानदक्षं ॥ शीलं मनःप्रार्थितकल्पवृक्षो । भवेद्यथाभूदिह शी-
लवत्याः ॥ ८ ॥ तथाहि—विमानशोभामिव लातुमुच्चैः । कृतोत्पताकाकरमद्विहारं ॥ लं-
कालकास्पर्धि गृहेंदिराभि—रभूत्पुरं श्रीपुरनामधेयं ॥ ९ ॥ परंतपो नाम बभूव तत्र । य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



थार्थसंज्ञः किल भूमिवल्लभः ॥ नष्टाहितानामिव दाहकृत्यै । यस्य प्रतापोऽब्धिहुताशनो-
ऽभूत् ॥ १० ॥ व्यापारसिद्धः सुधनप्रसिद्धः । श्रेष्ठी पुरे श्रीपतिरस्ति तत्र ॥ तस्यास्ति पु-
त्रः स्वकवंशभानुः । सम्यग्गुणः श्रीधरनामधेयः ॥ ११ ॥ तस्यास्ति कंदर्पमही वधूका ।
शीलोत्कटा शीलवतीति नाम्ना ॥ छायेव देहस्य सदानुवर्तिनी । पतिव्रता कोकिलमंजु-
भाषिणी ॥ १२ ॥ अथान्यदा श्रीधर आचचक्षे । कृतांजलिः स्वं जनकं विधिज्ञः ॥ इ-
च्छामि गंतुं भवदाज्ञयाहं । व्यापारकृत्ये जलधौ विशेषात् ॥ ११ ॥ अकृत्रिमस्नेहवशेन
तातः । प्रोवाच पुत्रं धृतगेहभारं ॥ मार्गा हि सर्वे विषमा भवंति । विशेषतो नीरधि-
मध्यसत्काः ॥ १२ ॥

स्थानस्थितस्तन्महता धनेन । व्यापारमुग्रं कुरु सारलाभं ॥ स्थानस्थितानामपि भा-
ग्यतः स्युः । स्तोकोद्यमेनापि लसद्धनानि ॥ १३ ॥ अब्धौ गतानामपि तद्विपर्ययात् ।
स्यान्मूलनाशोऽपि कुतो धनानि ॥ संति प्रभूतान्यपि ते धनानि । दैवानुकूल्यान्मयका-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्जितानि ॥ १४ ॥ वाक्यं निशम्येति पितुः कुमारः । प्रत्यूचिवान् कोमलभाषणेन ॥ तात ब्रवीष्येव वचस्तु सम्यग् । यद् दुर्गमो नीरनिधिः प्रतीतः ॥ १५ ॥ न्नाव्यं यदा यद्भवतीह तत्तदा । मनोऽभिलाषो मम पूरणीयः ॥ सर्वेऽतिलाभाश्च समुद्भजाता । निगद्यते यद्व्यवसायिलोकैः ॥ १६ ॥ इत्याग्रहात्पित्रनुशासनेन । स श्रीधरोऽपूरयदुग्रसत्वः ॥ पोतं क्रयाणैर्बहुमूल्यलभ्यै-र्द्वीपांतरं बुद्धिनिधिर्यियासुः ॥ १७ ॥ विधाय सर्वामथ योग्यतां स । शुन्ने दिने निश्चित इन्यमुख्यः ॥ रात्रौ प्रियां सप्रणयं गृहस्य । स्वरूपमूचे विजनं विदित्वा ॥ १८ ॥ जलाध्वनाहं दयिते यियासु-र्द्वीपांतरं सद्व्यवसायहेतोः ॥ यद्यस्ति विश्वे नियतेर्विनिश्चय—स्तथापि कार्यो मनुजैर्धनोद्यमः ॥ १९ ॥

माधाः स्वचित्ते वरगात्रि दुःखं । शीलस्थितिं शुद्धतमां च कुर्याः ॥ स्युर्यद्यपीह स्वयमेव दक्षा । अनातुरा दुःख उपस्थितेऽपि ॥ २० ॥ आरोप्यते तैः स्वहितोपदेश-स्तथापि चित्ते बहुमानपूर्वं ॥ रत्नानि तेजो मणिकारहस्त-कृतं दधत्यस्तमलान्यपीह ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ २१ ॥ अत्रांतरे गर्भगृहस्य पश्चा-द्भित्तौ स्थितस्तस्कर एकधूर्तः ॥ तेनोच्यमानां सकलां प्रियायै। शुश्राव वार्तामपि सावधानः ॥ २२ ॥ अत्रास्ति भूमौ निहितं सुवर्णं। रक्ष्यं त्वया तन्न जने प्रकाश्यं ॥ विभूषणं तेऽस्ति सुमूल्यमंगे। यत्नस्तु तत्रापि विधेय एव ॥ २३ ॥ आपृच्छ्य यातः पितरं सभार्य-मंभोधियात्रां सममिभ्यवृंदैः ॥ सुवर्णलुब्धस्य जनो हि मार्गं। प्राप्नोति चेत्तर्हि तमानयत्यपि ॥ २४ ॥ कांताथ तस्य प्रतिपन्नशीला। कृतादरा पूज्यकुटुंबवर्गे ॥ पप्रच्छ लोकान् जलधेः समेतान्। स्वकांतसत्कां कुशलप्रवृत्तिं ॥ २५ ॥ चौरोऽप्यथाकर्ण्य गृहस्वरूप-मचिंतयच्चेतसि धूर्तमुख्यः ॥ ज्ञातस्य वित्तस्य मयात्र गेहे। मनाक् स्थितिः स्यादधिका तु नैव ॥ २६ ॥

तत्खात्रदानेन मया न कार्यः। स्वजीवसंदेहकरः प्रयासः ॥ मया धनं स्त्रीसहितं प्रपंचाद्-ग्राह्यं प्रपंचो हि निजार्थसिद्ध्यै ॥२७॥ इत्थं विनिश्चित्य ययौ स चित्ते। पल्लीं प्रगल्भामथ तस्कराणां ॥ प्रच्छं सिषेवे विनयाच्च तस्या। आवर्जना स्याद्विनयेन यस्मात् ॥२८॥ अ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



थान्यदा तस्कर एष धूर्तः । पल्लीपतिं तं विनयाद्व्यजिज्ञपत् ॥ तव प्रसादान्निजमीप्सितं भन्नो । कुर्वे प्रसादो महतां हि धार्यः ॥ २९ ॥ त्वं वायुवेगं करभं प्रदेहि । विश्वासयुक्ताय महीश मह्यं ॥ विधाय कार्यं करभेण शीघ्र–मेष्यामि ते तत्सहितः समीपे ॥३०॥ तस्मिन् प्रदत्ते करभेऽथ तेन । जगाम स श्रीपुरमुत्सुकः सन् ॥ विधाय वेषं वणिजस्य चौरो । यदस्ति वेषभ्रमतः प्रमोषः ॥ ३१ ॥ विधाय कूटं चपलं तु लेखं । समागमच्छ्रीपतिमंदिरं सः ॥ स्त्रीद्रव्यलिप्सुः कपटे पटिष्णुः । कुर्यान्न लोभात् किमु यच्छरीरी ॥३२॥ उत्तीर्य लेखं करभात्स धूर्तः । समार्पयच्छ्रीपतये दिवापि ॥ प्रणामपूर्वं कृतभक्तिकाय । धूर्तस्य चिह्नं विनयः प्रकामं ॥ ३३ ॥ उन्मुद्य लेखं त्वरितं महेभ्यः । सुतस्य हर्षादिति वाचयत्यहो ॥ स्वस्त्यंकिते श्रीपुरनाम्नि तत्र । द्वीपात्कटाहेत्यभिधानसारात् ॥ ३४ ॥ सस्नेहमुत्कंठितमानसः सन् । स श्रीधरस्तातपदान्नमस्यन् ॥ आशीर्वदन् विज्ञपयत्यनल्पं । कार्यं यथा चात्र समाधिरस्ति ॥ ३५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उत्पन्नमस्तीह महद्धि कार्यं । प्रेष्यं धनं भूनिहितं समग्रं ॥ प्रेष्या वधूरप्यविलंबमेव । विश्वासहेतुर्यदयं नरोऽस्ति ॥ ३६ ॥ मत्वाथ लेखस्य स सम्यगर्थ—मृजुस्वभावो मनसीत्यचिंतयत् ॥ प्रस्थाप्यते चेत्सधना वधूटी । शंकामनस्तो न हि यात्यवश्यं ॥ ३७ ॥ आत्मीयपाणेरपि नैव कार्यो । विश्वास इत्थं निगदंति लोकाः ॥ प्रस्थाप्यते नो यदि तर्हि चोपा–लंभः समेतस्य सुतस्य भावी ॥ ३८ ॥ मत्वेति वैषम्यमुपस्थितः स । प्रोवाच पुत्रि क्रियते किमत्र ॥ उवाच सा शीलवतीति तात । वदत्ययं यत्तदतीवसत्यं ॥ ३९ ॥ कृतां रहस्त्वत्तनयेन वार्तां । यद्वेत्त्ययं मूलत एव सर्वां ॥ तन्नैव कार्यो भवता विलंबो । विश्वस्तभृत्ये न हि किं प्रदेयं ॥ ४० ॥

तन्मां धनं चापि समर्पयास्मै । सुखेन यास्यामि समं ह्यनेन ॥ तस्यां स्थितायामिति तन्निगद्य । श्रेष्ठी बभाषे सरलस्वभावः ॥ ४१ ॥ भवंतु मार्गास्तव भद्रदायिनः । समीहितं साधय भर्तृदर्शनात ॥ पीत्वेति तद्वागमृतं वधूः सा । स्वभर्तृलब्ध्युत्सुकमान-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साद्भूत ॥ ४२ ॥ तं चौरं भृत्यवेषं मधुररसभरैः खाद्यपेयैः प्रतुष्टं । चक्रे पत्युरुक्ता साऽमृतसमवचनै रंजितं भर्तृभक्ता ॥ स्वार्थे यस्माज्जनोऽयं सकलमिह यतो भाविनं वेत्ति चित्ते । तस्मिन् भृत्येऽपि नीचे विविधतममहाभक्तिभंगिं तनोति ॥ ४३ ॥ इति महोपाध्यायश्रीधर्मसागरगणिपंडितश्रीविमलसागरगणिशिष्यपंडितश्रीपद्मसागरगणिकृतौ शीलप्रकाशे शीलवतीप्रबंधे प्रथमः सर्गः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ द्वितीयः सर्गः प्रारभ्यते ॥

अथ श्रीपतिना पृष्टः । संज्ञां लेखस्य लेखने ॥ जगाद कितवश्चंद्र–वेगोऽहमिति तस्करः ॥ १ ॥ कृत्वाथ भोजनं शील–वती तेन समं तदा ॥ विन्यस्य करभे स्वर्णं । तत्तद्भूषणसंयुतं ॥ २ ॥ अनुज्ञाता चचालेयं । स्वजनैः करभस्थिता ॥ विश्वासो हि गृहं लोके । विनाशयति जन्मिनां ॥ ३ ॥ युग्मं ॥ चलन् चौरः स्मितांभोज–नेत्रामध्वनि वीक्ष्य तां ॥ धन्यंमन्यः स्वयं चित्ते । चिंतयामास सादरं ॥ ४ ॥ विशालनयना बाला ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सत्कपोलोद्भटस्तनी ॥ क्षामोदरी स्मरागारं । मया प्राप्तातिभाग्यतः ॥ ५ ॥ इयं पुण्यो-
दयादेव । मम हस्तगताभवत् ॥ अन्यथा क्वेदृशी प्राप्ति-र्महाजीषणकर्मणः ॥ ६ ॥

अस्यां भर्तृवियुक्तायां । न कार्यो मयका हठः ॥ मंदंमंदं कृतस्नेहा । स्वयं मयि भ-
विष्यति ॥ ७ ॥ एकाकिनी मया सार्धं । वियुक्ता बंधुवर्गतः ॥ करिष्यति सदा प्रीति-
महमप्यनया सह ॥ ८ ॥ कृत्वेति निश्चयं रात्रौ । त्यजन्मार्गं स तस्करः ॥ अचालयदि-
वात्मान-मुत्पथे करभं निजं ॥ ९ ॥ व्याघ्रचित्रकसिंहेभ-रवश्रवणभीषणां ॥ प्रेक्ष्याटवी-
मियं बाला । दध्याविति निजे हृदि ॥ १० ॥ त्यजन्मार्गं क्व गंतास्ती-दानीमयमिहोत्प-
थः ॥ किमुप्रसि सुमार्गं भो । गृह्णास्युत्पथमत्र किं ॥ ११ ॥ स्मित्वेत्यूचेऽथ चौरस्तां । प-
श्यन् शीलवतीमुखं ॥ मुग्धे मौग्ध्यात्स्वनाथस्य । माज्ञासीर्मां हि सेवकं ॥ १२ ॥ बा-
ल्यादारभ्य चौरोऽहं । सर्वधूर्तशिरोमणिः ॥ रात्रौ सुंदरि ते भर्त्रा । कथ्यमानामहं तदा
॥ १३ ॥ वार्तामश्रृणवं सर्वां । गृहपृष्ठे व्यवस्थितः ॥ कूटं कृत्वा च तल्लेख-कर्मादि कृत-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वानिदं ॥ १४ ॥ युग्मं ॥ चौरभूमिरियं भद्रे । तत्र गंतास्मि सांप्रतं ॥ मह्यं धात्रा विती-
र्णा त्वं । मान्यचित्ता नवात्र तत ॥ १५ ॥ प्रभुरत्रास्ति पल्ल्यां मे । सर्वचौरशिरोमणिः
॥ येनायं करभो दत्तो । मह्यं स्वार्थैकसिद्धये ॥ १६ ॥ त्वं मे कांता नवाहं च । तव
दासोऽस्मि सर्वदा ॥ इत्युक्त्वा विरते तस्मिन् । चेतसि सा व्यचिंतयत् ॥ १७ ॥
हा हा डुष्कर्मणां कोऽपि । विपाको ह्येष डुष्करः ॥ संतापयति मामेवं । फणि-
फूत्कारसन्निनः ॥ १८ ॥ उभयोर्लोकयोर्नाशो । नावी मे म्लेछसंगतः ॥ पानजोजन-
वस्त्रादि । दूषितं मे नविष्यति ॥ १९ ॥ प्रवर्तयेद् डुराचारं । स्वैरमेष कदाचन ॥ नि-
षेद्धास्ति तदा कोऽत्र । निर्जनेऽरण्यमंडले ॥ २० ॥ पातयित्वा निजं देहं । पर्वतात्पृथि-
वीतले ॥ प्राणान् वोपायतोऽन्यस्मा–त्त्यजामि विहितोद्यमा ॥ २१ ॥ अथवेद्धं विधाया-
पि । मृतायाः मम डुर्गतिः ॥ नवित्री धनहानिश्च । प्राणनाथस्य सर्वथा ॥ २२ ॥ ज्ञा-
स्यंति मरणं नैव । निर्मितं मयका जनाः ॥ अटव्यां यन्न कोऽप्यस्ति । तत्र गत्वा प्रब-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पकः ॥ २३ ॥ ज्ञास्यंति प्रत्युतैवं ते । विटेन सह दंभतः ॥ दुश्चारिणी धनं लात्वा । भोगलांपट्यतो गता ॥ २४ ॥ अकीर्तिर्मे कुलस्यापि । म्लानिश्चाप्यथ भाविनी ॥ तर्हि नो मरणं कुर्वे । पर्याप्तं चिंतयानया ॥ २५ ॥ कृते प्रतिकृतौ नास्ति । दोषः कश्चिन्म- हीतले ॥ कुर्वे कपटिनानेन । सार्धं कपटमादरात् ॥ २६ ॥ अन्यथा नास्ति मे मोक्षो । दुष्टादस्मान्नराधमात् ॥ विचार्येति त्रिधा शुद्ध्या । भर्तृप्रेमवती सती ॥ २७ ॥ दुःखं नि- रुध्य चित्ते सा । हसंती कृत्रिमं तदा ॥ उवाच पूर्वं यद्भद्र । चिंतितं जातमद्य तत् ॥ २८ ॥

तथाहि सूर्यमल्लाख्य-पुरेऽस्ति सर्वकामदः ॥ यक्षराट् महिमागारं । भक्तकामित- दायकः ॥ २९ ॥ उपयाचितं तस्येति । मया मानितमस्त्यहो ॥ लोकनाथ पतिर्मेऽस्ति । परिणीतोऽतिदुःखदः ॥ ३० ॥ भर्त्रा कदर्थितानेना-रम्य पाणिग्रहादहं ॥ नपुंसकत- या भोग-विमुखेन निरंतरं ॥ ३१ ॥ तांबूलं नैव भोगो न । विलासस्य कथापि न ॥ किं बहूक्त्या वृथा मेऽस्ति । भववासः करोमि किं ॥ ३२ ॥ लप्स्ये प्रसादतस्तेऽन्यं । व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ह्वन्नं चेद्वरं तदा ॥ त्वदपूजाविधानेन । करिष्यामि धृतिं तव ॥ ३३ ॥ करिष्ये संगमं
नैव । तेन त्वत्पूजनं विना ॥ तेनोपयाचितेनैव । दत्तस्त्वं मे वरः प्रियः ॥ ३४ ॥ य-
द्दत्तोऽस्तु मे कांतो । भवानेव मनोगतः ॥ त्वदायत्तास्म्यहं यत्ते । रोचते कुरु तन्म-
यि ॥ ३५ ॥ पल्लीं गतस्य ते हस्ता–त्त्वत्स्वामी मां गृहीष्यति ॥ मनोरथोऽपि मे स्वा-
मिन् । विलयं यास्यति ध्रुवं ॥ ३६ ॥ पल्लीं मा गास्ततो भद्र । चल किंचित्पुरंप्रति ॥
सुस्थानवासमाधाय । जीवितं स्वं पवित्रय ॥ ३७ ॥ भद्र तद्रम्यते सूर्य–मल्लसंज्ञं पुरं वरं
॥ धनेन बहुनानेन । तत्र गत्वा सुखं व्रज ॥ ३८ ॥ देवस्य दर्शनं याव–न्न स्यान्मम
मनीषितं ॥ कार्यस्तावत्त्वया नैव । स्पर्शो मे विग्रहस्य तु ॥ ३९ ॥

इत्थं शीलवतीप्रोक्तं । सर्वं सत्यं विवेद सः ॥ बभूव सूर्यमल्लाख्य–पुरे गंतुं समु-
त्सुकः ॥ ४० ॥ तया प्रतारितः पांथान् । पृष्ट्वा मार्गं तदीयकं ॥ अचालयत्करभकं । द-
क्षा किं न करोति यत् ॥ ४१ ॥ कियद्भिर्दिवसैस्तत्र । चौरोऽयं गतवान् पुरे ॥ दृदर्शो-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्यानभूमौ च । यक्षप्रासादमुत्तमं ॥ ४२ ॥ प्रासाददर्शने जाते । उत्तीर्य करजादियं ॥
प्रासादमध्यमागत्य । स्तोतुमिदं प्रचक्रमे ॥ ४३ ॥ जय त्वं जगतामीश । त्वं हि लोके
हितप्रदः ॥ अनाथनाथो राजालि–निर्मिताभ्यर्चनः स्फुटं ॥ ४४ ॥ स्तुत्वेति लक्षपूजार्थं
ढौकितं तत्पुरो धनं ॥ मनःस्थितनिजस्वामि–संगमप्रार्थनात्तया ॥ ४५ ॥ कृत्वा यक्षनम-
स्कारं । प्रोचे चौरं सती तदा ॥ पृच्छ कंचित्पुरेऽत्रैव । सस्त्रीकनरवासदं ॥ ४६ ॥ पूजा-
कारं तयेत्युक्ते—ऽपृच्छच्चौरोऽपि तं तदा ॥ पुरेऽत्रास्ति स कश्चिद्यो । वैदेशिकगृहप्रदः ॥
॥ ४७ ॥ उचे पूजाकरो भद्र । संत्यत्र श्रेष्ठिनो घनाः ॥ तेष्वप्यस्ति महाधर्मी । धनदे-
वो धनीश्वरः ॥ ४८ ॥ अंगजाः संति चत्वार–स्तस्य पंचाननोपमाः ॥ पृष्ट्वा तत्सदनं या-
हि । भाविनी तत्र ते स्थितिः ॥ ४९ ॥ उत्तिष्ठ करभं भद्रे । आरुहेत्यवदत्स तां ॥ इ-
त्युक्तेऽचिंतयत्सापि । शास्त्रतत्वविशारदा ॥ ५० ॥

यद्यप्यनुचितोऽत्रास्ति । करभारोह एष मे ॥ तथाप्यवमरापाता–न्न दोषाय भवि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्यति ॥ ५१ ॥ स्वछंदेन प्रवर्तेऽहं । यदि तर्हीति मंस्यति ॥ संत्यत्र स्वजना नूनं । पुरेऽस्या उपलक्षिते ॥ ५२ ॥ अहं प्रतारितो बुध्ध्या–नयेत्येष विचार्य मां ॥ मारयित्वापि यात्येव । तत्कुर्वे चौरभाषितं ॥ ५३ ॥ ततः करभमारुह्य । सह तेन चचाल सा ॥ स्मरंती सुंदरी गोत्र–देवतामिष्टदायिनीं ॥ ५४ ॥ रथ्याप्रश्नपरश्चौरो–ऽप्यथ तन्मंदिरं गतः ॥ उत्तीर्णा करभाद्बाला । ददृशे बंधुभिः स्वकैः ॥ ५५ ॥ दर्शनात्सहसा तस्याः । साश्चर्यं दुःखमादधुः ॥ बंधवस्तेऽथ बालायै । ददावाशीर्वचस्तदा ॥ ५६ ॥ अथ तां बांधवाः प्रोचु–रागमः किमतर्कितः ॥ जातोऽयमत्र ते भर्तुः । कुले कुशलमस्त्यहो ॥ ५७ ॥ अथाख्यद् बंधुवर्गाय । तदा शीलवतीति सा ॥ कुले श्वशुरसत्के मे । कुशलं खलु विद्यते ॥ ५८ ॥ अब्धौ पोताधिरूढस्य । पत्युः शासनतो ह्यहं ॥ अतर्किता समायातो–ल्लंघ्याज्ञा स्वामिनो न यत ॥ ५९ ॥ इत्युक्त्वा भ्रातृजायाभि–र्नतपादा यथाक्रमं ॥ आशिश्राय गृहस्यांत–र्विमानं देवता यथा ॥ ६० ॥ कृत्वा मतिं शीलवती प्रगल्भां । चित्ते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निजे मोदन्नरं बभार ॥ तस्य स्वरूपं न जगाद सुंदरी । चकार यत्तत्तु निशम्यतामथ ॥
॥ ६१ ॥ इति महोपाध्यायश्रीधर्मसागरगणिपंडितश्रीविमलसागरगणिशिष्यपंडितश्रीपद्म-
सागरगणिकृते शीलप्रकाशे शीलवतीप्रबंधे द्वितीयः सर्गः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ तृतीयः सर्गः प्रारभ्यते ॥

कपिरिव शाखापतितो । विस्मृतभोज्यादिसर्वकरणीयः ॥ कूपे पतितोऽकस्मा–दिव
बाह्यो जीवलोकाच्च ॥ १ ॥ सार्थभ्रष्टोऽरण्ये । पथिक इव भ्रांतखिन्नचेतस्कः ॥ मूलछिन्न-
स्तरुरिव । म्लानस्तस्थौ स चौरोऽपि ॥ २ ॥ तेनैव सुंदर्यार्थो । चौरेणानाय्य करन्नवि-
न्यस्तः ॥ भूषणसुवर्णसहितः । करंभकः स्वांतिके न्यस्तः ॥ ३ ॥ करन्नोऽपि शीलवत्या
। वाक्याच्चौरेण तत्र शालायां ॥ बद्धो धूर्तो धृष्टो । यत्स्यान्मौनेन कार्यकरः॥ ४ ॥ ऊ-
चे बंधूनिद्धं । शीलवती न्नो न्नवेत् श्रमोऽस्यापि ॥ शुष्यति गलं तदस्मै । देयं पेयं ध्रु-
वं सलिलं ॥ ५ ॥ अद्यैव कार्यवशत––स्त्वरितमसौ श्रेष्ठिशासनाऽंता ॥ द्रम्मान् शंबल-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हेतोः । प्रददीध्वं षोमशत्रितयं ॥ ६ ॥

तद्बंधुभिस्तथास्मै । कृते च चौराय दुःखितायांतः ॥ उच्चैः स्वरेण सदया । प्रोक्तवती शीलवत्येवं ॥ ७ ॥ भो याहि तत्र शीघ्रं । ब्रूया मे क्षेममिष्टवर्गेषु ॥ मार्गे क्षेमं भूया–त्त्वापि मम पालिताङ्गस्य ॥ ८ ॥ पीत्वेति शीलवत्या । वचोऽमृतं लज्जितः स चौरोऽपि ॥ करभं विमुच्य गतवान् । लोभः स्यात्किमिह लाभाय ॥ ९ ॥ चौरे गतेऽथ शील—वती स्वचित्ते व्यचिंतयच्चैवं ॥ लब्धं जीवितमद्य । प्रभावतो विमलशीलस्य ॥ १० ॥ अभविष्यदन्यथा मे । कुलद्वयस्यापि निंदनीयत्वं ॥ जीवन् गतोऽपि यदसौ । हेतुस्तस्यापि सुकृतमिह ॥ ११ ॥ कृत्वा ह्यनेन कपटं । मुग्धाहं वंचिता तदारण्ये । सकलजनप्रत्यक्षं । पुरेऽप्यसौ वंचितो मयका ॥ १२ ॥ गोत्राधिदेवमहिम—निदानमिह किंचिदस्ति नान्यच्च ॥ प्राप्तौ शुभस्य लोके । शक्तिमती देवता यत् सा ॥ १३ ॥ तीर्णो विपत्पयोधि–र्मया यतः शीलवाहनेन तदा ॥ माहात्म्यतोऽथ भर्तु–र्भावी संगस्तु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्यैव ॥ १४ ॥ ध्यात्वेति सुंदरी सा । चकार शीलैकरक्षणे यत्नं ॥ महिमागारे लोकः । करोति यत्नं हि दृष्टफले ॥ १५ ॥ चौरोऽपि खिन्नचेता । गत्वाटव्यां रुरोद बाढं सः ॥ उत्पन्ने खलु दुःखे । द्वारमिदं विद्यते भुवने ॥ १६ ॥ चित्ते व्यचिंतयच्च । विधिर्बली- यानहो नरो नैव ॥ मम करगतमपि कांता–रत्नं चिक्षेप पांशौ यः ॥ १७ ॥ पुरुषोऽप्यहं त्रिलोक्यां । प्रथमो निर्बुद्धभाग्ययुतलोके ॥ एषापि भाग्यबुद्धि–प्रधानलोकोत्तरा ज्ञे- या ॥ १८ ॥ बुद्ध्या स्वया हि ययका । विहितं वित्तात्मरक्षणं कामं ॥ करभश्च सोऽपि निन्ये । भृशं मिलत्या मया साकं ॥ १९ ॥ मानान्निजमाकूतं । तस्यै मूढेन भाषितं म- यका ॥ दृष्ट्वा सुंदरकांतां । प्रायः स्याद्यज्ञानो मूढः ॥ २० ॥ ज्ञात्वा चौरं लोका । अ- मुं हनिष्यंति भीष्मकरणीयं ॥ कृत्वेत्यहमनया न । प्रकटीचक्रे हि सदयत्वात् ॥ २१ ॥ तदियं धन्या कांता । कुलजाता सदयहृदयदक्षा मे ॥ अधमस्य हस्ततो य–च्च्युता न तच्चित्रमस्त्यत्र ॥ २२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तद्वल्लभावियोगा–त्त्यजाम्यसून् भैरवादिपातेन ॥ गृहिता मंजुगुणा स्त्री । निर्मितिना
तेन विधिना यत् ॥ २३ ॥ पल्लीनाथसमीपं । प्रयामि चेत्तर्हि मारयेन्मां सः ॥ कृत्वा व-
स्तुविनाशं । न शक्यते स्थातुमस्याग्रे ॥ २४ ॥ इत्थं विचार्य चित्ते । जगाम चौरोऽपि
सिद्धभूमिधरं ॥ तत्रास्ति सिद्धयोगि–द्वयमतुलैर्योगिभिः सहितं ॥ २५ ॥ पवनाभ्यासवि-
धानौ । सिद्धौ तौ भ्रातरौ तदा सोऽपि ॥ मूर्ताविव वृषकोशौ । तत्र सिषेवेऽतिभक्तियु-
तः ॥ २६ ॥ कुर्वाणोऽपि च सेवां । कांतां कांतां स नो विसस्मार ॥ नवयौवना सुरूपा
। कथं हृदो याति कांता यत ॥२७॥ नत्वान्यदा बभाषे । तौ सिद्धौ योगिनायकौ चौ-
रः ॥ अर्पयतं मम योगं । शिष्यीकृत्यांतिके धत्तं ॥ २८ ॥ तं योगिनौ विरक्तं । प्रेक्ष्य
भवादूचतुस्तदा चौरं ॥ नव्यवया अपि किमहो । त्वमीहसेऽस्मद्व्रतं घोरं ॥ २९ ॥ अ-
वदत्सोऽपि यथार्थं । न विद्यते मे गृहं धनं नैव ॥ तस्माद्दिह्वे दीक्षां । प्रसीदतं तत्प्रदा-
नेन ॥ ३० ॥ तौ तस्य कर्णमुद्रा–न्यासवरयोगकस्य सुमुहूर्ते ॥ शंखध्वनेन पूरित–स-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्यमित्रस्य चादत्तां ॥ ३१ ॥ चौरः प्राप्य तदीयपादकमलोपास्तिं स्वभाग्यात्तदा । चौर्यं निजदुश्चरित्रममुचत् संगः सतां यत शुभः ॥ चित्ते तां तु सुरूपयौवनधरां कांतां विसस्मार नो । यद्यस्यान्नवदिष्टमत्र भुवने तद्यत स नोपेक्षते ॥ ३२ ॥ इति महोपाध्यायश्रीधर्मसागरगणिपंडितश्रीविमलसागरगणिशिष्यपंडितश्रीपद्मसागरगणिकृते शीलप्रकाशे शीलवतीप्रबंधे तृतीयः सर्गः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ चतुर्थः सर्गः प्रारभ्यते ॥

अत्रांतरे कटाहाख्य-द्वीपेऽसौ श्रीधरो धनी ॥ क्रयाणकानि विक्रीय । प्राप्तवांस्तटभूमिकां ॥ १ ॥ स्थापयित्वा प्रवहणं । श्रीधरोऽपि तटेंबुधेः ॥ भांडादिरक्षणे दत्वा । भृत्यानामनुशासनं ॥ २ ॥ यावज्जनकपादानां । प्रणामोत्कंठितोऽभवत् ॥ शीलवत्याश्च संगेऽस्य । तावद्वामांगमस्फुरत् ॥ ३ ॥ दक्षिणांगं पुनस्तस्य । स्फुरतिस्म तदा रयात् ॥ यद्यज्ञावि भवेत्पुंसां । तन्निमित्तं भवेत्पुरः ॥ ४ ॥ अचिंतयत्तदा दक्ष-श्चेतसि श्रीधरोऽपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सः ॥ मम पूर्वं कियद् दुःखं । भावि पश्चात्सुखं पुनः ॥ ५ ॥ अभीष्टं च सुरं स्मृत्वा । स डाक् श्रीपुरमभ्यगात् ॥ आपत्संभावनायां च । लोके देवस्मृतिः स्मृता ॥६॥ प्रणनाम ततो गेहे । पितृपादपयोरुहं ॥ वियोगतापप्रशमं । कुर्वन् हर्षाश्रुवारिणा ॥ ७ ॥ अथोवाच पिता वत्स । किमेकाकी समागतः ॥ प्रवेशमहसे पूर्वं । कथं न प्रेषितो जनः ॥ ॥८॥ अनिष्टं जलमार्गे ते । न जज्ञे किमपि सुत ॥ क तिष्ठति वधूः शील-व्रती पृष्टौ समागता ॥ ९ ॥ एवं तातेन पृष्टे स । चेतसीति व्यचिंतयत् ॥ हाहा पूर्वसमुत्पन्न-दुर्निमित्तप्रमाणता ॥ १० ॥ केनाप्यलीकसंकेतात् । मधना मम सुंदरी ॥ आत्मायत्तीकृता जाने । किं करोमि क यामि च ॥ ११ ॥ इत्थं विमृश्य चित्ते स । पुनश्चिंतयतिस्म च ॥ वृद्धस्य पुरतो वक्तु-र्यथार्थं वच्मि चेत्तदा ॥१२॥ तर्हि हानिद्वयादेव । मृत्युस्तस्य भविष्यति ॥ व्रजेयुर्ननु वार्द्धक्ये । प्राणा आपत्समागमे ॥ १३ ॥ असत्यमुत्तरं कुर्वे । ततोऽस्येति विमृश्य सः ॥ उवाच तातपादानां । दर्शनोत्सुक आगमं ॥ १४ ॥ इतो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गत्वा पुनस्तात । मंडप्यां च क्रयाणकं ॥ उत्तार्य त्वय्यरीत्याहं । समेष्यामि सत्वार्यकः ॥ १५ ॥ इत्युक्ते च पितोवाच । वत्स गच्छ यथागतः ॥ कृत्वानुपदमायामि । सामग्री-मुचितां स्यात् ॥ १६ ॥ आपृच्छ्य जनकं गेहा-न्निर्गतो दुःखत्वागयं ॥ पोतं त्यक्त्वा तटें त्वोधे—ययौ धीरेतरो वने ॥ १७ ॥ स रुरोद भृशं कुर्वन् । विहंगानपि निश्चलान् ॥ व्रजेयुर्विरहार्तानां । प्राणा द्वारमिदं न चेत् ॥ १८ ॥

निग्रह्याथ स्वयं दुःखं । ग्रहिलः स्नेहतस्तदा ॥ विचारयामास चित्ते । धीनिधिः श्रीधरस्ततः ॥ १९ ॥ विलासो वेधसोऽगाध-वारांनिधिनिभो भुवि ॥ अन्यथा चिंतितं कार्य-मन्यथा विदधाति सः ॥ २० ॥ सद्वंशजा लसच्छीला । स्नेहगेहं गुणोत्तरा ॥ याति क्वापि न मां हित्वा । वार्धिवेलेव सुंदरी ॥ २१ ॥ ज्ञात्वा रहस्यवार्तां मे । कुतश्चिद्धूर्त-शेखरः ॥ कश्चिन्मुढीचकारेमां । मम वेषविधानतः ॥ २२ ॥ वनांतरे तथा कूप्र-गह्वरे स्थानकांतरे ॥ मुक्तापि मद्वियोगेन । स्थास्यत्येषा कियच्चिरं ॥ २३ ॥ द्वीपव्यापारबुद्धिर्मे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



। जज्ञे विरहहेतवे ॥ आगमिष्यं यदि नाहं । कोऽग्रहिष्यत स्त्रियं हि मे ॥ २४ ॥ इ-
त्थं स विलपन् खिन्नो । वृक्षवल्लीविहंगमान् ॥ पप्रच्छ स्त्रीगतिं भ्रांतो । व्रजन् कार्श्यं दि-
ने दिने ॥ २५ ॥ कदाचित शीलसंपत्त्या-स्तस्याः प्राप्तिर्भविष्यति ॥ एतत्कदाशया प्रा-
ण-त्यागस्तु मम नोचितः ॥ २६ ॥ ममैकहृदया सापि । प्रार्थयेऽभीष्टदेवतां ॥ तोषयं-
ती सुनैवेद्या-दिभिः संभाव्यते यतः ॥ २७ ॥ तस्याः सान्निध्यमाधाय । तन्मां सा प्रा-
प्स्यति ध्रुवं ॥ गत्वा क्वचन तीर्थेऽह-मपि योगीशसंगतः ॥ २८ ॥ संचिनोमि तपः सारं
। विचिंत्येति ययौ ततः ॥ पत्नीवियोगदुःखार्तः । सिद्धभूध्रं तमेव सः ॥ २९ ॥ स्थित-
स्तत्र स्वभार्याया । विश्लेषेण कृशोऽपि सन् ॥ तपोभरेणातिकृशो । बभूव श्रीधरस्तदा ॥
॥ ३० ॥ योगमादत्त तद्योगि-पार्श्वे श्रीपतिदेहजः ॥ दुःखगर्भं हि वैराग्यं । योगबु-
द्धिप्रवर्धकं ॥ ३१ ॥

योगिनस्तत्र ये वृद्धा । निर्मोहाः स्वसमाधितः ॥ श्रीधरस्तु न तैः सार्धं । चक्रे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





किमपि जल्पनं ॥ ३२ ॥ आत्मतुल्यवयश्चौर-योगिना सार्धमिन्यसूः ॥ चक्रे गोष्टिं यत-स्तुल्य-वयस्स्वेव हि मित्रता ॥ ३३ ॥ वणिग्योगी बभाषे त-मन्यदा चौरयोगिनं ॥ योगिन् पवनसिध्द्यादि-स्वरूपं ब्रूहि किंचन ॥ ३४ ॥ इति तद्वचनं श्रुत्वा । बभाषे चौ-रयोगिकः ॥ नवो योगी न जानामि । कथां योगस्य तादृशीं ॥ ३५ ॥ परं भिक्षाविहा-रादि । कुर्वहे सज्जनाविव ॥ एकत्रैव भवान् भव्यो । भाग्यान्मित्रं बभूव मे ॥ ३६ ॥ अन्यदा रात्रिसमये । चौरयोगी जगाद तं ॥ अद्य शेयावहे योगिन् । एकस्मिन् स्र-स्तरेऽप्यहो ॥ ३७ ॥ तेनेति गदिते स स्वी-चकार वणिजोत्तमः ॥ चौरयोगी तु नि-द्रायां । प्रलापमकरोद्दृशं ॥ ३८ ॥

प्रभातसमये जाते । वणिग्योगी जगाद तं ॥ प्रललाप भवान् रात्रौ । कथमित्र-महो सुहृत् ॥ ३९ ॥ आकर्ण्य वचनं तस्य । प्रत्यूचे चौरयोगिकः ॥ रात्रौ मेऽभूत्प्रला-पो यः । मास्ति वार्ता महत्यहो ॥ ४० ॥ मास्म पृच्छ ततस्त्वं मे । वार्ता दुःखस्य दा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यिनीं ॥ चालितं जीर्णशल्यं नो । नवेत्तापाय देहिनां ॥ ४१ ॥ तस्करं योगिनं प्राह । वणिग्योगी पुनस्तदा ॥ अवाच्यं सुहृदोऽप्यस्ति । मम तद् ब्रूहि सर्वतः ॥ ४२ ॥ आख्यातुमहमप्यस्मि । प्रोद्यतश्चरितं निजं ॥ आवयोः सदृशं दुःखं । चित्ते यद्विद्यते सुहृद् ॥ ४३ ॥ इति तद्वचसा चौर-योगी सर्वं जगाद तत ॥ यथार्थं चरितं स्वीयं । यावद्योगाश्रयं तदा ॥ ४४ ॥ अहो मित्र गता हस्ता—न्मम स्त्री सधना यतः ॥ ततो निरंतरं दुःखात् । प्रलपामि निशीत्यहो ॥ ४५ ॥ निवेदितमिदं मित्र । स्वरूपं स्वप्रसन्निन्नं ॥ त्वयकापि निजं वाच्यं । यथार्थं चरितं मम ॥ ४६ ॥

इति चौरवचः श्रुत्वा । चेतसीति व्यचिंतयत ॥ प्राप्तैवाद्य मया भाग्या-त्तन्वी शीलवती सती ॥ ४७ ॥ ममाथ विरहात्तस्याः । प्राणा यास्यंति सत्वरं ॥ अलं तस्माद्विलंबेन । यामि तत्रैव सत्वरं ॥ ४८ ॥ विमृश्येति जगादाथ । वणिग्योगी स तं तदा ॥ इदानीमस्ति नो भिक्षा-वेला तद्गम्यतेऽधुना ॥ ४९ ॥ वृत्तांतमात्मनो रात्रौ । कथयि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चौरनिवेदितं ॥ ५९ ॥ अत्रांतरे समायातं । वीक्ष्य स्वं स्वामिनं तदा ॥ चिंतयामास सा शील-वती हर्षितमानसा ॥ ६० ॥

इह स्थितां च मां दृष्ट्वा । हृदयेऽसौ विमृक्ष्यति ॥ मुक्ता तातेन किमिय-मिहा-गात्कथमेकिका ॥ ६१ ॥ कथं ज्ञातं च मे वृत्त—ममिलत्क च तस्करः ॥ श्वशुरेणापि नाज्ञायि । भ्रातृभिर्न च मामकैः ॥६२॥ त्रिकालदर्शिना केना-प्याख्यायि चरितं हि मे ॥ अन्यथा स्वयमागत्या-श्वासिताहं प्रियेण किं ॥ ६३ ॥ रक्षितं च कथं शीलं । यौव-नोन्मत्तयानया ॥ राक्षमन्नेव युवती । कैर्नाम न हि भुज्यते ॥ ६४ ॥ दिव्यात्प्रत्याययाम्येन—मत्युष्णादतिशीतलात ॥ एवं विचिंत्य सा बाला । न्यधात्तत्पदयोर्दृशौ ॥ ६५ ॥ परस्परं प्रमोदोऽभूत । सुचिरोत्कंठयोस्तयोः ॥ उत्कंठा मिलने पुंसां । प्रमोदोत्कर्षदा यतः ॥ ६६ ॥ अथ वर्धापयामासुः । श्रीधरं स्वजनस्त्रियः ॥ साक्षाद्रत्नाकरमिव । ददृशु-स्तं जना भृशं ॥ ६७ ॥ स्नानभोजनतांबूला—दानावसरतो मुदा ॥ सांयात्रिकविनोदेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्यामि तेऽग्रतः ॥ उक्त्वेति गुर्वनुज्ञातो । ययौ निद्रामिषात्ततः ॥ ५० ॥ अचालीत् श्रीधरः सूर्य-मल्लनामपुरंप्रति ॥ भूमावास्फालयन्निद्रा-पात्रं हर्षप्रकर्षतः ॥ ५१ ॥ गतेऽथ श्रीधरे गेहात् । श्रीपतिः स्वजनैर्वृतः ॥ ययौ वार्धितटे तत्रा-पश्यत्तं न वधूं तथा ॥५२॥ भृत्येऽन्यस्तत्स्वरूपेऽसौ । ज्ञातेऽचिंतयदित्यथ ॥ केनापि वंचितो नूनं । धूर्तेन सरलो ह्य-हं ॥ ५३ ॥ पुत्रोऽप्यनिष्टशंकी मे । त्यक्त्वा देशांतरं गतः ॥ कृतालीकोत्तरः पत्न्या । विरहव्यथितो भृशं ॥ ५४ ॥ गतः श्वशुरगेहं स्यात् । कदाचित् श्रीधरस्ततः ॥ प्रस्थाप-यामि सल्लेखं । भृत्यं तच्छुद्धये ध्रुवं ॥ ५५ ॥ विमृश्येति तथा चक्रे । श्रीपतिर्वल्लभात्म-जः ॥ व्रजन् मार्गेऽथ भृत्योऽपि । श्रीधरायामिलत्तदा ॥ ५६ ॥ एवं तमाह भृत्योऽपि । किमर्थं चेष्टितं ह्यदः ॥ निषिध्येति ब्रुवंतं तं । पुरमध्ये स चागतः ॥ ५७ ॥ कृत्वा वि-शिष्टवेषं स । सभृत्यः सदनं ययौ ॥ शीलवत्या यतः किंचित् । सतां न्यूनं न विद्यते ॥ ५८ ॥ तत्र शीलवतीं दृष्ट्वा । कृशांगीं विरहार्तिभिः ॥ अमन्यत तदा सत्यं । सर्वं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



। दिनं स निरशेषयत् ॥ ६८ ॥ रात्रौ क्रीडागृहे नाना-पुष्पप्रकरभूषिते ॥ प्रदीपोद्योति-
ते विष्वक् । सुरभिद्रव्यवासिते ॥ ६९ ॥ सुखशय्यां समारूढः । प्रौढरोमांचकंचुकां
॥ आलिंग्य प्रेयसीं बालां । स्ववृत्तांतमुवाच सः ॥ ७० ॥ स्वछंदो विषयांभोधि-पूरः प्र-
ववृते ततः ॥ रेमाते निर्भरं तत्र । तच्चित्तजलमानुषे ॥ ७१ ॥

प्रभातकृत्यं कृत्वा स । द्रविणव्ययमातनोत् ॥ सलेखं प्राहिणोद् भृत्यं । पूर्वं तात-
स्य तुष्टये ॥ ७२ ॥ स्थित्वा तत्र दिनानि हर्षितमनाः कामं कियंतीन्यसू-रिभ्यैः सारत-
रैर्वृतोऽथ चलितो निर्मापितप्रेक्षणः ॥ तन्वन् याचकराशये घनधनं स श्रीधरः श्रीधरः ।
प्राप्तः स्वे नगरे स्वभीरुसहितस्तातस्य चक्रे मुदं ॥ ७३ ॥ शीलं यथाभूदिह लोक एव ।
कष्टप्रमोक्षे पटु शीलवत्याः ॥ इष्टागमं कीर्तिविवर्धकं च । तथा परेषामपि तद्भतां तत् ॥
॥ ७४ ॥ इति महोपाध्यायश्रीधर्मसागरगणिशिष्यपंडितश्रीपद्मसागरगणिकृते शीलप्र-
काशे शीलवतीप्रबंधे चतुर्थः सर्गः समाप्तः ॥ श्रीरस्तु ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ अथ पंचमः सर्गः प्रारभ्यते ॥

अहो सहोदरं तेज-स्तेजःपतिसुशीलयोः ॥ परेषां तेजसां येन । चक्रे किल निमीलनं ॥ १ ॥ संघादिकार्ये जीवानां । हिंसनं कुत्रचिन्मतं ॥ सत्वरक्षाविधानादौ । मृषाभाषाप्युदीरिता ॥ २ ॥ आत्ते दत्ते द्विषां वित्ते । महत्त्वं भूभुजां भवेत् ॥ एकांतेन निषिद्धो न । गृहस्थानां परिग्रहः ॥ ३ ॥ तथा दिग्गमनं भोगो-पभोगोऽपि न निंदितः ॥ दाक्षिण्यविषयेऽनर्थ-दंडोऽप्यंगीकृतोऽस्ति च ॥ ४ ॥ परं परप्रियासंगो । वारितो विविधागमे ॥ अतो व्रतोत्तमं शीलं । पाल्यमास्तिकमानवैः ॥ ५ ॥ भूस्पृग्भूदेवतां याति । पिशुनः परमं पदं ॥ महासतीत्वं वामापि । यस्माच्छीलं तदाश्रय ॥ ६ ॥ अभाग्या अपि सद्भाग्या । अप्रिया अपि सप्रियाः ॥ सरोगा अपि नीरोगाः । शीलान्मर्त्याः स्त्रियोऽप्यहो ॥ ७ ॥ शीलवतीव ये शीलं । पालयंति मुदा सदा ॥ इह तेषां भवेत्कीर्तिः । स्वर्गमोक्षौ परत्र च ॥ ८ ॥ तथाहि—वृत्ताकारेऽकरान्तेऽत्र । जंबूद्वीपे नराकरे ॥ स-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मस्ति न्तारतं क्षेत्रं । पावितं न्तूरिसूरिन्निः ॥ ९ ॥ तत्रास्ति विबुधाधारं । महीधरत्नसत्फ-
लं ॥ नंदनोद्यानवत्प्रौढं । सन्नायं नंदनं पुरं ॥ १० ॥ तत्र श्रीअरिदमनः । कमनीयतर-
द्युतिः ॥ जगत्प्रियः श्रियां पात्रं । सद्राजाजनि विश्रुतः ॥ ११ ॥
रत्नै रत्नाकरः स्वर्णैः । स्वर्णाद्रिर्मुर्तिमान्मतः ॥ तस्मिन् रत्नाकरः श्रेष्टी । बभूव पु-
रवल्लनः ॥ १२ ॥ प्रद्युम्नयुक्ता पुरुषो-त्तमगेहनिवासिनी ॥ जिनभक्तिरता श्रीव-त्तस्य
श्रीरिति गेहिनी ॥ १३ ॥ तयोस्त्रिवर्गपरयो-र्वासराः पुण्यन्नासुराः ॥ यांति श्रांतिन्निदो-
ऽन्योन्यं-रक्तयोरवियुक्तयोः ॥ १४ ॥ जिनपूजाप्रभावेण । तथा देव्यनुन्नावतः ॥ तयोः
प्राप्तेन कालेन । पुत्रो जातः शुन्ने दिने ॥ १५ ॥ पुत्रजन्मोत्सवस्तेन । निर्ममे शर्म-
शालिना ॥ कुलागतविधिश्चापि । दानसन्मानपूर्वकं ॥ १६ ॥ संपूज्य त्वजितं देवं ।
संतोष्य स्वजनव्रजं ॥ तनयस्याजितसेन । इति नाम स दत्तवान् ॥ १७ ॥ धात्रीभिः
पाल्यमानोऽसौ । लाल्यमानोऽखिलैर्जनैः ॥ पित्रोर्मनोरथैः साकं । ववृधे वृद्धन्नाग्यवान्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ १८ ॥ क्रमेण यौवनं प्राप । सौभाग्यभरभासुरं ॥ अकृत्रिमं यत्कृतिनां । देहभूषण-
मुच्यते ॥ १९ ॥ तत्प्रेक्ष्य जनको दध्यौ । जनकोटिविशारदः ॥ कानुरूपा वरा कन्या ।
धन्या चास्य महीतले ॥ २० ॥ सुरूपा सुगुणा कन्या । क्वापि मृग्या मया नयात ॥
इति चिंतापरे तस्मि-न्नागादेको वणिक्सुतः ॥ २१ ॥ व्यवसायस्वरूपं प्राग् । पृष्ट आ-
यव्ययं तथा ॥ यथातथ्यं स आचख्यौ । दृष्टपूर्वं ततोऽवदत् ॥ २२ ॥ त्वदादेशादहं श्रे-
ष्ठिन् । गतः कृतांगलां पुरीं ॥ व्यवसायं प्रकुर्वाणः । स्थितस्तत्र स्थिराशयः ॥ २३ ॥

सदापि जिनदत्तेन । व्यवहारो ममाभवत ॥ ततः कदाचित्तेनाहं । भोजनार्थं नि-
मंत्रितः ॥ २४ ॥ दिव्यरूपां तदावासे । दृष्ट्वैकां वरकन्यकां ॥ पृष्टः श्रेष्ठी सुता कस्य ।
किंनाम्न्येषा मयेति सः ॥ २५ ॥ श्रेष्ठी जगौ सुता मेऽसौ । सर्वलक्षणलक्षिता ॥ छंदो-
लक्षणसाहित्या-लंकारादिविशारदा ॥ २६ ॥ निमित्तज्ञानमप्येषा । लिखिताद्यास्तथा
कलाः ॥ शकुनारावपर्यंता । जानाति जनतामता ॥ २७ ॥ अर्थतो नामतश्चापि । पु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्री शीलवती सती ॥ परं वरं न पश्यामि । योग्यमस्याः क्ष्मातले ॥ २८ ॥ तेन मे हृदये चिंता–चिता ज्वलति नित्यशः ॥ ततः संतापसंपन्नो । नाप्नोमि हृदि निर्वृतिं ॥२९॥ इत्युक्त्वा विरते तस्मिन् । जगदे मयकांगदे ॥ सति बाहुविभूषायाः । का चिंता वद कोविद ॥ ३० ॥ रत्नाकरसुतकरं । प्राप्येयं मुदिता सती ॥ चिंताचितासमुद्भूतं । संतापं तेऽपनेष्यति ॥ ३१ ॥ कोऽयं रत्नाकरः श्रेष्ठी । विश्रुतस्तत्सुतोऽस्ति कः ॥ इति पृष्टे मया सर्वं । यथावृत्तं निवेदितं ॥ ३२ ॥ निशम्यैतत्समोदोऽसौ । विमृश्य प्राह मामिति ॥ त्वया ह्युत्तारितः शीघ्रं । चिंताब्धेर्दुस्तरादहं ॥ ३३ ॥

अतस्त्वं स्वपुरं याहि । गृहीत्वा जिनशेखरं ॥ पुत्रं मदीयमुद्वाह–मेलनायाविलंबितः ॥ ३४ ॥ तं लात्वाहं समेतोऽस्मि । तदादेशं प्रदेहि मे ॥ श्रेष्ठी तद्वचनं श्रुत्वा । सहर्षोऽमुं समादिशत् ॥३५॥ त्वत्समाना वणिक्पुत्रा । भवंति भुवि भाग्यतः ॥ एक कार्यकृते प्रैषि । त्वं मयानेककार्यकृत् ॥ ३६ ॥ श्रेष्ठिपुत्रं जगन्मित्रं । शीघ्रमानय आनय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ विलंबो युज्यते नात्र । विवाहविधिकर्मणि ॥ ३७ ॥ तेनाहूतस्ततः सोऽपि । समागा-
त्तस्य सद्मनि ॥ यथोचितं च विनयं । कृत्वा सुस्थानमासदत् ॥ ३८ ॥ कृत्वासनप्रदाना-
दि-सन्मानं तस्य चोच्चकैः ॥ पप्रच्छ कुशलं श्रेष्ठी । जिनदत्तस्य गेहगं ॥ ३९ ॥ तत्स्व-
रूपं निरूप्यासौ । विवाहविषयां ततः ॥ वार्तां निवेदयामास । स्वतातगदितां मतां ॥४०॥
तदाकर्ण्य सहर्षः सन् । श्रेष्ठी रत्नाकरस्तदा ॥ संमेल्य स्वजनव्यूहं । तैः सार्धं स व्यचा-
रयत् ॥ ४१ ॥ सर्वेषां सम्मते नीते । ज्योतिर्विदमथाह्वयत् ॥ जन्मपत्रीं दर्शयित्वा । त-
योर्लग्नं तदा ददौ ॥ ४२ ॥

श्रेष्ठिपुत्रः सच्चरित्र-स्ततः स्वनगरं ययौ ॥ स्वरूपं श्रेष्ठिनः सर्वं । शशंस सुमनाः
स्वयं ॥ ४३ ॥ निशम्य जिनदत्तोऽपि । तदुक्तं व्यक्तमादरात् ॥ चक्रे विवाहसामग्रीं । स-
मग्रां व्यग्रमानसः ॥ ४४ ॥ समीपगे शुभे लग्ने । स्वजनादिसमन्वितः ॥ ययौ रत्ना-
करः श्रेष्ठी । जिनदत्तपुरं वरं ॥ ४५ ॥ पुत्रं विवाह्य सोल्लासं । जगाम स्वपुरं पुनः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गृहप्रवेशं पुत्रस्य । श्रेष्ठी श्रेष्ठदिनेऽकरोत् ॥ ४६ ॥ गृहव्यापारभारं स । सुते न्यस्य नयाश्रयः ॥ जिनधर्मपरो जज्ञे । ततो निश्चिंतमानसः ॥ ४७ ॥ स्वस्वकर्मरते स्फीते । कुटुंबे निशि चैकदा ॥ मध्यरात्रौ घटं लात्वा । ययौ शीलवती क्वचित् ॥ ४८ ॥ घनवेलां बहिः स्थित्वा । पुनरागान्निजं गृहं ॥ श्रेष्ठिना जागरूकेण । तद् दृष्टं बाह्यचक्षुषा ॥ ४९ ॥ तद् दृष्ट्वैव विमृष्टं हि । कुशीलैषा वधूर्मम ॥ गृहे स्थापयितुं नैव । युज्यतेऽतः परं ततः ॥ ५० ॥

तथा परजनस्याग्रे । गदितुं नैव पार्यते ॥ नीतिशास्त्रे यतः प्रोक्तं । प्राक्तनैः कविभिस्त्विति ॥ ५१ ॥ अर्थनाशं मनस्तापं । गृहे दुश्चरितानि च ॥ वंचनं चापमानं च । मतिमान्न प्रकाशयेत् ॥ ५२ ॥ निवेद्य पुत्रपुरतो । गृहान्निष्कासयाम्यमुं ॥ इति ध्यात्वा निशावृत्तं । तनयस्य न्यवेदयत् ॥ ५३ ॥ तत श्रुत्वा श्रेष्ठिसूर्दध्यौ । कलाया भुवि चेद्विधोः ॥ अंगारवृष्टिसृष्टिः स्यात । सुधाया विषमुल्बणं ॥ ५४ ॥ भानुदयः प्रतीच्यां वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



। वार्धिर्मुद्रां त्यजेदथ ॥ चलेत्कुलाचलश्रेणि-स्तदास्याः स्यात्कुशीलता ॥ ५५ ॥ परं गुरोरिवेदं मे । ह्यनुल्लंघ्यं पितुर्वचः ॥ मौनमेव परं कर्तुं । युज्यते मम सांप्रतं ॥ ५६ ॥ तूष्णीभूते ततस्तस्मिन् । श्रेष्ठी गत्वा बहिश्चिरं ॥ स्थित्वागत्य च गेहं स्व-दयितांप्रत्यदोऽवदत ॥ ५७ ॥ कृतांगलापुरीतोऽद्य । जन एकः समागमत ॥ तेन संदेशको मेऽग्रे । कथितो दुःश्रवः प्रिये ॥ ५८ ॥ कोऽसौ तयेति गदिते । जिनदत्तस्य गेहगं ॥ मांद्यं न्यवेदयत्तस्यै । पुत्र्या आकारणं तथा ॥ ५९ ॥

त्वमित्युक्ते तया सोऽथ । वधूं लात्वाचलन्निशि ॥ बुध्या ज्ञातं तया कूटं । परं नोवाच किंचन ॥ ६० ॥ कियन्मार्गे ययौ याव-न्नद्येका तावदागमत् ॥ ततः श्रेष्ठी वधूं प्राहो-त्तारयोपानहौ पदोः ॥ ६१ ॥ तया नोत्तारिते ते तु । श्रेष्ठी चिंतितवांस्तदा ॥ एकमस्याः कुशीलत्व-मन्यो ह्यविनयस्तथा ॥ ६२ ॥ एकाकिनी मुच्यते चे-दपवादो जनात्तदा ॥ अस्याः पितृगृहं गत्वा । मुंचामि तदिमां जवात ॥ ६३ ॥ मुरुक्षेवं व्रजन् सोऽ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्रे । फलितं वीक्ष्य तां जगौ ॥ क्षेत्रेशस्य नविष्यंति । बहवो मुझमूटकाः ॥ ६४ ॥ तन्निशम्यावदत् सामी । तेन चेत्स्युरनक्षिताः ॥ भक्षितास्तर्हि नैवास्य । नवितारोऽत्र ते गृहे ॥ ६५ ॥ तदाकर्ण्य विषणात्मा । श्रेष्ठी दध्यौ स्वचेतसि ॥ प्रत्यक्षं कूटभाषिण्या । अस्याः किं कथ्यते बहु ॥ ६५ ॥

ततोऽपि व्रजता तेन । सुवाससहितं पुरं ॥ दृष्ट्वातिहृष्टचित्तेन । प्रोचे लोका घना इह ॥ ६६ ॥ साननणच्छून्यनगरं । वासार्थं सोऽविशत्पुरं ॥ परमुत्तारको नैव । तस्य दत्तो जनैरिह ॥ ६७ ॥ वृक्षाधस्तादयं तस्थौ । साकाशे दूरतः स्थिता ॥ प्रनाते चाग्रतो गछन् । शस्त्रव्रणकिणांतिकं ॥ ६८ ॥ नरं विलोक्य सोऽवोचत । शूरोऽयं सुनटस्ततः ॥ स हि चेत् कुट्टितो नाय-मेकग्रामं गतस्ततः ॥ ६९ ॥ युग्मं ॥ लोकं स्तोकतरं दृष्ट्वा । सोऽगदङुद्वसः किमु ॥ वसंतीह सदा सार्धं । साभाणीत् सप्त पाटकाः ॥ ७० ॥ गछंतमग्रतस्तं सा । निन्ये मातुलमंदिरं ॥ तत्र सुस्थमनाः सोऽपि । तस्थौ लेजे च भोजनं ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शील-
प्रकाशः
॥ ३६ ॥

॥ ७१ ॥ सा स्थानमानदानैश्च । तद्दिनं स्थापिता च तैः ॥ अस्यै चलनवेलायां । क-
रंभं शंबलं ददे ॥ ७२ ॥ वरं वटं च सा प्राप्य । मार्गे भोक्तुमुपाविशत् ॥ तन्निरीक्ष्य
वटोर्ध्वस्थः । काक एकस्तदा जगौ ॥ ७३ ॥ ददासि चेत्करंभं मे । दर्शयामि निधेर्भु-
वं ॥ तदाकर्ण्य वधूरेव-मगृणात्सुगुणैकभूः ॥ ७४ ॥ यत्कृतो दुर्नयश्चैक-स्तेन निष्कासि-
ता गृहात् ॥ द्वितीयं चेत्करोम्योकः । पितुर्नाप्नोम्यहं तदा ॥ ७५ ॥

मौनं कुरु ततः काक । मा वराक पुनर्वद ॥ गुणागुणविचारस्तु । यत्र तत्र वसे-
न्न हि ॥ ७६ ॥ आचख्यौ तन्निशम्यासौ । किं त्वया गदितं वधु ॥ साप्याह सत्यमेवै-
तत् । प्रत्यक्षमपि दृश्यते ॥ ७७ ॥ यतो निशि प्रसुप्ताह-मित्यश्रौषं शिवारुतं ॥ नद्यां
याति वहन् सालं-कारश्चारुशवशाशवः ॥ ७८ ॥ तमाकृष्याभरणानि । गृहीत्वैनं ददातु मे
॥ तत श्रुत्वा कुंभमादाया-चकृषं तडयादमुं ॥ ७९ ॥ तस्यास्तु कुणपं दत्तं । वित्तं चा-
त्तं मया पुनः ॥ तद्गुणेनाहमियतीं । भूमिं नीता भवादृशैः ॥८०॥ काको मे कथयत्ये-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष । दशलक्षसुवर्णयुक् ॥ स्वयं निधानं गृह्णीध्वं । करंभं ददताशु मे ॥ ८१ ॥ ततो नि-
वेदयाम्यस्य । गृहीष्ये न हि किंचन ॥ यत्कल्पितापराधेऽपि । स्थानं संत्याजितामुना
॥ ८२ ॥ तत श्रुत्वोच्छ्वसितानेक-रोमकूपो जगावयं ॥ सत्यं वत्से निशावृत्तं । सावोच-
द्गतमेव भोः ॥ ८३ ॥ तच्चेद्यूयं न मन्यध्वं । काकवाक्यं तदा हृदा ॥ विचारयत येन
स्यात् । पाश्चात्येऽपि सुनिश्चयः ॥ ८४ ॥ दत्ते करंभे काकेन । दर्शितं निधिभूतलं ॥
क्ष्मां खनित्वा रात्रौ तं । जग्राह मुदिताशयः ॥ ८५ ॥ लक्ष्मीमिव मन्यमानो-ऽथवा तां
गोत्रदेवतां ॥ रथे निवेश्य चलितः । सोऽपृच्छत्पूर्वसंशयान् ॥ ८६ ॥ साजल्पच्छुद्धसप्रा-
यो । ग्रामोऽयं कथ्यते किमु ॥ यत्रावयोर्भोजनादि-सामग्री सकलाभवत् ॥ ८७ ॥ भ-
यात पलायमानस्य । प्रहारा यस्य पृष्ठके ॥ लगंति हीनसत्वस्य । स कुट्टित इति स्मृ-
तः ॥ ८८ ॥ पुरं चारु वरं यत्त-दुद्वसं गदितं मया ॥ स्वजनाभाव एवात्र । कारणं वा-
सवारणं ॥ ८९ ॥ वृक्षाधस्तात्तथा रात्रौ । न स्थेयं विबुधेन यत ॥ प्रायः पन्नगचौरादि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भयं तत्र भवेन्नृणां ॥ ८० ॥ वृध्या धान्यं समादाय । कर्षुको यत्र निर्वपेत् ॥ तत्क्षेत्रं भक्षितं ज्ञेयं । नान्नमुत्पन्नमस्ति यत् ॥ ८१ ॥ नद्यामुत्तारिते यन्न । पादुके तत्र कारणं ॥ कंटकाः कर्कराश्चात्र । भवंति चरणार्तिदाः ॥ ८२ ॥ तदाकर्ण्य सकर्णोऽसौ । तदा चिंतितवानिदं ॥ असौ मान्या न सामान्या । कमलेव मम ध्रुवं ॥ ८३ ॥ समेत्य सदनं सद्यो-ऽलंकारा दर्शितास्तया ॥ तान् सुवर्णमयान् प्रेक्ष्य । शुद्धचेता जगावसौ ॥८४॥

अविमृश्यकारिणा य-द्विरुद्धं मयका त्वयि ॥ औत्सुक्यवशतश्चक्रे । दंतव्यं तत्त्वयानघे ॥ ८५ ॥ दयितापुत्रपुरतो । मार्गवृत्तं न्यवेदयत् ॥ श्रुत्वा च द्वावपि परां । मुदं धत्तः स्वचेतसि ॥ ८६ ॥ कियद्भिर्वत्सरैः काले । श्रेष्ठी रत्नाकरोऽपि सः ॥ आयुः प्रपूर्य विधिना-नशनी स्वर्गमाप्तवान् ॥ ८७ ॥ तदा त्वजितसेनोऽपि । संसारासारतां विदन् ॥ जिनधर्मरतो नित्यं । बभूव परमार्हतः ॥ ८८ ॥ इति महोपाध्यायश्रीधर्मसागरगणिशिष्यपंडितश्रीपद्मसागरगणिकृते शीलप्रकाशे शीलवतीप्रबंधे पंचमः सर्गः समाप्तः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ अथ षष्ठः सर्गः प्रारभ्यते ॥

तदारिदमनो नृपो । मनस्येवं व्यचारयत ॥ बुद्धिमान् को नरोऽत्रास्ति । कुर्वे तं मंत्रिपुंगवं ॥ १ ॥ तत्परीक्षाकृते प्रौढ-गजमेकं चतुष्पथे ॥ बंधयित्वा पुरीमध्ये । घोषणामित्यकारयत् ॥२॥ य इमं तोलयित्वाशु । मानं कुर्यान्नरोत्तमः ॥ राज्यचिंतां नृपस्तस्मि-न्निधत्ते मानपूर्वकं ॥ ३ ॥ केनापि पटहो नासौ । स्पृष्टः स्पष्टधिया पुनः ॥ ततश्चाजितसेनेनां-गीकृतं मानमादरात् ॥ ४ ॥ वाहने क्षेपयित्वामुं । रेखां कृत्वा जलाद्बहिः ॥ पुनरुत्तारयामास । ग्रावाणो निहितास्ततः ॥ ५ ॥ रेखां यावत्पयोमग्ने । पोते तानुदतारयत ॥ तुलायां तोलयित्वामून् । मानं राज्ञः पुरोऽवदत् ॥ ६ ॥ ततस्तुष्टेन राज्ञासौ । मंत्रीशो विहितो हितः ॥ सद्यः फलप्रदानेन । देवेभ्योऽप्यधिका नृपाः ॥ ७ ॥ तस्य बुद्धिबलेनासौ । दमयित्वा बहूनरीन् ॥ स्वं नाम सार्थकं चक्रे । द्विषच्चक्रे प्रतापवान् ॥ ॥ ८ ॥ तस्मिन् देशे क्वचिद्ग्रामे । दुर्बलस्तु कृषीवलः ॥ कोऽप्येको वसति श्रीम-न्नि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रया कृतजीवनः ॥ ९ ॥

सोऽन्यदा कस्यचित्पार्श्वाद्-गृहीत्वा वृषभौ शुभौ ॥ खेटयित्वा चिरं क्षेत्रं । संध्यायां गृहमागमत् ॥ १० ॥ जातखेदौ बलीबर्दौ । धनिकस्य गृहेऽनयत् ॥ तस्मिन्न पश्यति संभाल्य । व्यग्रत्वान्नार्पितौ पुनः ॥ ११ ॥ निशायां तौ हृतौ तत्र । तस्करैः पापकारकैः ॥ ततस्तेन धृतः स द्राक् । प्राक्सत्कर्मविवर्जितः ॥ १२ ॥ बहुलः कलहो लग्नो । भग्नोऽसौ दुर्बलो यतः ॥ दुर्बलानां बलं राजा । विचिंत्येत्यचलच्च तं ॥ १३ ॥ न्यायार्थं नगरं गच्छन् । भणितः केनचिद् द्रुतं ॥ पलायमानं तुरगं । दंडेनाहत्य वालय ॥ १४ ॥ लकुटेनाहतस्तेन । मर्मघातादसौ मृतः ॥ ततो धृतो विशेषेण । घोटकस्वामिनापि सः ॥ १५ ॥ कुर्वतां कलहं तेषां । लग्ना वेला बहिर्घना ॥ अतस्ते वटवृक्षाधः । सुप्ताः सर्वेऽपि मानवाः ॥ १६ ॥

नटानां पेटकं तत्र । स्थितमस्त्यग्रतोऽद्भुतं ॥ नाट्यं विधाय तदपि । सुप्तं निद्राम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वासवत ॥ १७ ॥ निद्रान्येषां समायाता । यातायातश्रमत्वतः ॥ क्षुत्तृड्दुःखजराक्रांत—
स्वांतः सोऽचिंतयत्तदा ॥ १८ ॥ न ज्ञायते महीपालो । विडंब्य विविधैर्वधैः ॥ मारयि-
ष्यति कैःकैर्मां । बहुधाऽन्यायकारिणं ॥ १९ ॥ आत्मानं वटशाखायां । बध्ध्वा पाशेन
तेन मे ॥ गतत्राणानिमान् प्राणान् । त्यजामि स्वामिनं विना ॥ २० ॥ विचिंत्येति वि-
भावर्या—मल्पामपि धिय विना ॥ शाखायां वटवृक्षस्य । बध्ध्वा पाशं गले न्यधात ॥२१॥
भारेण त्रुंटितं वस्त्रं । नटस्योपरि सोऽपतत ॥ यस्यैकस्य प्रसुप्तस्य । दीर्घनिद्रामवाप सः
॥ २२ ॥ अतो नरा उद्भटास्ते । बबंधुस्तमबंधुरं ॥ दुर्दशायां समायांति । विपदः परितो
यतः ॥ २३ ॥ प्रभाते च ततो जाते । वातेनेवार्कतूलवत् ॥ सभायां नृपतेर्नीतो । वि-
नीतोऽपि स तैर्बलात् ॥ २४ ॥ स्वस्वरूपे विरूपे तै—र्नृपस्याग्रे निरूपिते ॥ तेषां वाद-
च्छिदे राजा—ऽजितसेनं समादिशत् ॥ २५ ॥ सोऽपि दुःस्थजनाधारः । कृपासारः परार्ति-
भृत ॥ सविचारः सदाचार—श्चित्ते चिंतितवानिति ॥ २६ ॥ तमसा लुप्तनेत्रोऽसौ । वरा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कः काकवत्कृशं ॥ घूकैरिवामीभिर्लोकै-रनेकैर्हि विडंब्यते ॥ २७ ॥

तदेनं दीनवदनं । सदनं ह्यबलं श्रियां ॥ रक्षामि क्षामकुक्षिं द्राक् । क्षुधया स्वधियाधुना ॥ २८ ॥ तेनोचे प्रथमस्तेषु । दृष्टया दृष्टौ वृषौ न वा ॥ सोऽवग् दृष्टौ तर्हि दृष्टिं । दत्वास्मै तौ गृहाण भोः ॥ २९ ॥ द्वितीयं प्राह तुरगं । प्रहरेति वचस्त्वया ॥ कथितं वा न सोऽवोचत । प्रोक्तं जिह्वां तदर्पय ॥३०॥ अश्वं मार्गय मार्गज्ञ जगाद स नटांस्ततः ॥ भव्यः कोऽपि भवन्मध्ये । बध्ध्वा पाशं गले दृढं ॥ ३१ ॥ वृक्षाधस्तात्प्रसुप्तस्य । पतत्वस्योपरि स्फुटं ॥ यथा स्वैरं भवद्दूरं । याति भाति भवद्यशः ॥ ३२ ॥ तत श्रुत्वा ते यथास्थानं । मानं मुक्त्वा गता द्रुतं ॥ एवं सोऽन्यानपि न्यायान् । कुर्वन् राज्यधुरं दधौ ॥ ३३ ॥ राज्ञोऽथ रिपुभूपाल-स्तस्य सिंहरथो रथी ॥ अस्ति तंप्रत्यचालीत् सः । कदाचित्कटकान्वितः ॥ ३४ ॥ तदा चिंतातुरं दृष्ट्वा-ऽजितसेनं धियां निधिः ॥ सती शीलवती प्राह । स्वामिन् बाधास्ति का हृदि ॥ ३५ ॥ तदाकर्ण्यावदन्मंत्री । नृपोऽद्य चलि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तः पुरात् ॥ तेन सार्धं मयावश्यं । गंतव्यं प्राणवल्लभे ॥ ३६ ॥ त्वां लात्वा यामि चेद्ग-
डे । गृहं शून्यं भवेत्तदा ॥ मुक्त्वाथ मंदिरे चैकां । गछतो मे न निर्वृतिः ॥ ३७ ॥
तन्निशम्यागदत्सापि । स्थितायां मयि निर्वृतिः ॥ कथं न भवतां स्वामिन् । देशांतर-
मुपेयुषां ॥ ३८ ॥

सोऽवोचन्मद्गृहे नान्यो । वृद्धो लघुरपि प्रिये ॥ एकाकिनी हि लघ्वी स्त्री । वि-
नाशं याति जातुचित ॥ तदाकर्ण्य जगादासौ । स्वामिन्नेषा कथा वृथा ॥ सीताया रा-
क्षसागारे । क आसीत्तत्र रक्षकः ॥ ४० ॥ परं यासां मनः शुद्धं । प्रबुद्धं च विशेषतः
॥ ताः पालयंति वै शीलं । विकटेऽपि च संकटे ॥ ४१ ॥ सोऽवदद्या महासत्यो । भवं-
त्येता हि तादृशाः ॥ ताभिरन्याः स्पर्धमाना । मानम्लानिं प्रयांति हि ॥ ४२ ॥ सावो-
चच्छीलसंगेन । महासत्यो भवंत्यमी ॥ ममाखंडितमेतच्च । शक्यते खंडितुं सुरैः ॥४३॥
यथा शेषाहिफणतो । रत्नं लातुं क्षमोऽस्ति कः ॥ तथा ममांगसंसर्गं । कर्तुं शक्नोति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कः प्रभुः ॥ ४४ ॥ एतदर्थं नवद्भिः श्री-लाभवद्भिः सुखश्रियं ॥ अनुभवद्भिर्नो कार्या । चिंता देहार्तिदा सदा ॥ ४५ ॥ मम वाचि न विश्वास-श्चेत्सतां भवतां हृदि ॥ तदेषा सुमनोमाला । विशाला गृह्यतां प्रभो ॥ ४६ ॥

अम्लानं यदि मे शीलं । सत्सूत्रसुमनःश्रिता ॥ सदेदृशी ते कंठेऽसौ । मालापि भवतात्तदा ॥ ४७ ॥ इत्युक्त्वा सा निजस्वामि-कंठे चिक्षेप तां स्रजं ॥ धत्ते विकासं या शीले । म्लानिं म्लानविधौ सदा ॥ ४८ ॥ ततश्चिंतां विमुच्यासौ । प्रस्थितो नूभुजा समं ॥ कंठस्थिताऽम्लानपुष्प-मालामंम्नितविग्रहः ॥ ४९ ॥ द्विषतो देशनिकटं । कियद्भिर्दिवसैर्नृपः ॥ प्रापाशु यत्र पुष्पाणि । जात्यादीनि भवंति न ॥ ५० ॥ मंत्रिकंठे पुष्पमाला-मम्लानां प्रेक्ष्य नृपतिः ॥ पप्रछ चंपकादीनां । मालेयं भवतः कुतः ॥ ५१ ॥ शोधितानि सुपुष्पाणि । मया देशेऽत्र सर्वतः ॥ कुत्रापि नैव लब्धानि । परं कंठे तवेक्ष्यते ॥ ५२ ॥ स उवाच प्रदेशेऽत्र । भव्यानि कुसुमानि न ॥ परं प्रयाणदिवसे । प-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्न्या क्षिप्तानि मे गत्रे ॥ ५३ ॥ राजा जगौ पुनर्मंत्रि—न्नम्लानानि तदा कथं ॥ सो-
ऽवक् शीलप्रभावेण । पत्न्या मे विश्वहारिणा ॥ ५४ ॥ तन्निशम्य नृपो दध्यौ । नूनं
सा देवता मता ॥ पृथिवीचरणा किंतु । सुरालया विदूरगा ॥ ६५ ॥ शतशः सचिवास्त-
स्य । राज्ञो राज्ये परे परं ॥ चत्वारश्चतुरास्तेभ्यो—ऽजितसेनोऽधिको धिया ॥ ६६ ॥

कामांकुरोऽत्र प्रथमो । द्वितीयो ललितांगदः ॥ तृतीयो रतिकेलिश्च । चतुर्थोऽशो-
क एव च ॥ ६७ ॥ अन्यदा विजने तान् स । दक्षानाकार्य कार्यवित् ॥ चतुर्णां पुरतो-
ऽवादी—द्वादीर्वोर्वीश ईदृशं ॥ ६७ ॥ पत्नी त्वजितसेनस्य । सपत्नीसार्थवर्जिता ॥ विष-
मायुधयोधेना—प्यहो नैवात्र जीयते ॥ ६७ ॥ ततोऽभ्यधुस्ते चत्वारः । कथं सा न जि-
तामुना ॥ जनस्य मनसो भावो । ज्ञायते नापि कोविदैः ॥ ६९ ॥ प्रत्यक्षं चेत्प्रमाणं
स्या—त्तदा मन्यामहे वयं ॥ अनुमानं प्रमाणं तु । प्रत्यक्षानुगमुच्यते ॥ ७० ॥ तदाक-
र्ण्य सकर्णोऽसौ । राजाख्यद्गौरवास्पदं ॥ अस्ति स्वस्तिकरं चास्याः । प्रत्यक्षं लक्षणं त्वि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



-दं ॥ ७१ ॥ तस्याः शीलप्रभावाद्य–दम्लाना पुष्पमालिका ॥ सदास्य सचिवस्योच्चैः । कं-
ठेऽकुंठे विलोक्यते ॥ ७२ ॥ एकदाऽन्याभिलाषित्वा–दुद्वहंतः सपत्नतां ॥ सचिवास्ते ज-
गुर्वामा–वामत्वं ननु वेत्ति कः ॥ ७३ ॥ तेषु तुर्योऽन्यधादेवं । विस्फुरन्मतयस्त्रयः ॥ अ-
त्र तिष्ठंतु कष्टं तु । सहिष्येऽहं गमागमात् ॥ ७४ ॥ परं सुमनसां म्लानि––मानयिष्ये
द्विधा त्वहं ॥ महीनाथ ममादेश–मतो देहि मुदे हितं ॥ ७५ ॥ तत् श्रुत्वा कौतुकी रा-
जा–ऽऽदेशं द्रव्यं च दत्तवान् ॥ उत्कंठितमनाः सोऽपि । तज्ज्ञात्वा चलितस्ततः ॥७६॥
कियद्भिर्दिवसैर्भव्या–नंदनं नंदनं पुरं ॥ प्राप संतापनिर्मुक्तः । परिवारवृतः स तु ॥७७॥

शीलवत्या गृहासन्न–शून्यगेहे स तस्थिवान् ॥ दिव्यालंकारसंयुक्तो । वस्त्राभरण-
मंडितः ॥ ७८ ॥ हावभावभवां चेष्टां । विविधां विदधाति सः ॥ वैडूर्यमणिवत्किंतु । म-
नस्तस्या न भिद्यते ॥ ७९ ॥ चित्तं तेन स्वयं दत्तं । वित्तं हर्तुं पुनस्तया ॥ दृष्टिर्नि-
वेशिता तस्मि–न्नेकवारं मुहुर्लता ॥ ८० ॥ दृष्टिदानादसौ हर्षं । प्रापांध इव सत्वरं ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पश्यन् कार्यन्तरं सिद्धं । निषिद्धमतिविभ्रमः ॥ ८१ ॥ ततो दूतीं शिक्षयित्वा–प्रेषयच्चटु-तांचिता ॥ सापि पापोचितां वार्तां । शीलवत्या न्यवेदयत ॥ ८२ ॥ तन्निशम्य सती प्राह । व्रतानि द्वादश त्विह ॥ संति सम्यक्त्वमूलानि । स्थूलानि गृहमेधिनां ॥ ८३ ॥ प्राणातिपातविरति–प्रमुखाण्यखिलान्यपि ॥ श्रीगुरूणां मुखात्तानि । गृहीतानि मया धिया ॥ ८४ ॥ तेषु शेषव्रतानां तु । भग्नानां स्यात्प्रतिक्रिया ॥ परं काचघटस्येव । नास्य संधनमर्हति ॥ ८५ ॥

स्त्रीभिस्तच्च विशेषेण । शेषेणेव वसुंधरा ॥ स्वांगेन सततं धार्यं । सर्वनाशोऽन्यथा भवेत् ॥ ८६ ॥ एकं तावन्महत्पापं । तस्मादर्थोऽपि नात्र यत् ॥ तत्फलस्यापि तृप्तिर्न । प्रवेशो म्लेच्छपाटके ॥ ८७ ॥ अतो ह्यनर्थदं कर्म नो । करिष्येऽहं कदाचन ॥ इत्थं व्रतद्वयीनाशे । विनश्येन्मे भवद्वयी ॥ ८८ ॥ दूती दध्यौ तदाकर्ण्य । स्वं चेदस्याः समर्प्यते ॥ अर्पयेत्स्वं तदा युक्तं । दीयते यत्तदाप्यते ॥ ८९ ॥ इति महोपाध्यायश्रीधर्मसा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गरगणिशिष्यपंडितश्रीपद्मसागरगणिकृते शीलप्रकाशे शीलवतीप्रबंधे षष्टः सर्गः समाप्तः

॥ अथ सप्तमः सर्गः प्रारभ्यते ॥

तस्मै न्यवेदयत्सर्वं । सापि गत्वा तदंतिके ॥ असौ विमर्शयामास । मानसे मानसेवधिः ॥ १ ॥ द्युम्नात्प्रद्युम्नसिद्धिश्चे-दत्र का मे क्षतिस्तदा ॥ एवं वर्णस्य वृद्धिः स्याच्च । प्रसिद्धिश्च नृपादिषु ॥ २ ॥ ततो दूतीमिति प्राह । सोऽस्याः सर्वस्वमर्पय ॥ उपस्थितं परं कार्यं । कष्टसाध्यं कुरूत्तरं ॥ ३ ॥ समेत्य सत्वरं तत्र । दूती तांप्रत्युवाच सा ॥ रतिस्ते कियता स्वेन । अर्धलक्षेण सावदत् ॥ ४ ॥ सापि प्रफुल्लचित्तास्या । वित्ताशापूरपूरणं ॥ कर्तुं हर्तुं च तस्यार्तिं । जगामाशोकसन्निधौ ॥ ५ ॥ समस्तं तेन तद्वित्तं । सचित्तं च समर्पितं ॥ तया मुदितया सर्वं । गृहीतं स्वगृहागतं ॥ ६ ॥

तथा कथापितं तस्य । पंचमे दिवसे त्वया ॥ यामे गते त्रियामायाः । समेतव्यं ममौकसि ॥७॥ तावता खानितो गर्त-स्तयापवरके वरे ॥ प्रछन्नपुरुषैः कूप-समानोऽति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भयंकरः ॥ ८ ॥ तस्योपरिष्टात्पल्यंको । जीर्णतृणविनिर्मितः ॥ स्थापितश्छादितश्चापि । वर्यतूलिकया स्फुटं ॥ ९ ॥ तया चतुर्भिर्दिवसैः । परिवारः क्वचित्क्वचित् ॥ प्रहितः स्वहितप्राप्त्यै । सा चैकैव तदाभवत ॥ १० ॥ पंचमाहस्तमस्विन्या । गते यामे स आगमत ॥ गृहमध्यस्थिता शय्या । तया तस्य प्रदर्शिता ॥ ११ ॥ मध्ये प्रविश्य शय्यायां । यावदेष उपाविशत् ॥ तूलिकासहितः शीघ्रं । तावद्गर्तांतरापतत ॥ १२ ॥ शून्यत्वमनुभूय प्राक् । चेतनासहितस्ततः ॥ चित्ते निध्यातवानेवं । सर्वशून्याश्रितोऽपि सः ॥ १३ ॥ अनया मम सर्वस्वं । गृहीतं नो समीहितं ॥ दत्तं हस्तावतो दग्धौ । पृथुकोऽपि गतो हहा ॥ १४ ॥ कुंभीपाकोपमं स्थानं । विपाकेन कुकर्मणः ॥ इह लोके मया लब्धं । परलोके च किं ब्रुवे ॥ १५ ॥

एषा महासती नूनं । मयि कोपं करोति चेत् ॥ तदा मां भस्मसात्कुर्या–ज्जिनधर्मरता परं ॥ १६ ॥ एवं चिंतयतस्तस्य । दिवसा वत्सरोपमाः ॥ यांति सा कृपया तस्मै । नो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जनं च प्रयच्छति ॥ १७ ॥ रज्जुबद्धशरावेण । मध्ये मुंचति किंतु नो ॥ बहिर्निष्कास-
येत्तं सा । स्वप्रशंसाबहिर्मुखं ॥ १८ ॥ मासे पूर्णे त्रयाणां स । मंत्रिणां भूमिपोऽवदत्
इयद्भिर्दिवसैर्धीमा–नशोको नागतः किमु ॥ १९ ॥ अथ तृतीयको दर्प–वशादाह वि-
शांपतिं ॥ रतिकेलिनामधेयो । रतकेलिसमुत्सुकः ॥ २० ॥ स्वामिंस्तस्यामयं मंत्री ।
मन्ये रक्तोऽभवद्भृशं ॥ व्रजंतमपि जानाति । नैव कालं सुखालसः ॥ २१ ॥ मां प्रेषय
क्षमानाथ । यथा स्वं नाम सार्थकं ॥ कुर्वे कृत्वा महत्कार्य–माज्ञया ते विशेषतः ॥२२॥
ततो नृपेनानुरूपे । दत्ते वित्तेन संयुते ॥ आदेशे मोदभृच्चेता–श्चपलो ऽाक् चचाल सः
॥२३॥ पूर्ववन्नगरं गत्वा । तत्र स्थित्वा च सादरं ॥ लकुदानं पुनर्दत्वा । गर्तापातं स ल-
ब्धवान् ॥ २४ ॥ अशोकरतिकेली द्वौ । गर्तावर्ते स्थितौ च तौ ॥ सार्थयुताविवाध्वन्यौ
। स्वस्ववार्तां प्रचक्रतुः ॥ २५ ॥ अन्नादिदानं तस्यापि । पूर्वरीत्या करोति सा ॥ जिन-
धर्मरतानां स्या–द्दया यत्सर्वजंतुषु ॥ २६ ॥ कथिते पूर्ववद्राज्ञा । जगाद ललितांगदः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रतिकेलिः स्वभावेन । वशावश्योऽस्ति सर्वदा ॥ २७ ॥ अहं यामि तदायामि । समीपे भवतां स्यात् ॥ कार्यं कृत्वा ममादेश-मतो देहि नृपोत्तम ॥ २८ ॥ ततः स प्रहितो राज्ञा । सहितो धनसंचयैः ॥ पूर्ववत्स तथा चक्रे । गृहीत्वा सार्धलक्षकं ॥ २९ ॥

चतुर्थोऽपि तथा चाभूद् । द्विलक्षव्ययकृत्स च ॥ चत्वारो मिलितास्तेऽत्र । तिष्ठंतिस्म भूयाकुलाः ॥ ३० ॥ तदारिदमनो राजा । जित्वा सिंहरथं नृपं ॥ मंत्रीशसहितश्चागात् । स्वकीयनगरे वरे ॥ ३१ ॥ कामांकुरादिभिस्ताव-दूचे शीलवतीति सा ॥ कारागारानुकराहं-कारान्नो वेदनाजनि ॥ ३१ ॥ तव तुंगं शीलशैलं । वज्रपाणिरपि स्वयं ॥ भेत्तुं शक्नोति नो विश्वे । कास्माकं गणना पुनः ॥ ३२ ॥ अत्यंधकूपतोऽतो नो । निष्कासय दयां कुरु ॥ महासति त्वदादेश-करा वयमतः परं ॥ तयोचे यदि मे वाक्यं । यूयं कुरुत तर्हि भो ॥ यदाभूदित्यहं वच्मि । भवद्भिस्तु तदा तथा ॥ ३४ ॥ अंगीकृते तैस्तद्वाक्ये । तत्स्वरूपं निरूप्य च ॥ मंत्रिणाकारयत्स्वीय-गृहे राजनिमंत्रणं ॥ ३५ ॥ तया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भोजनसामग्री । प्रछन्नं कारिता तदा ॥ यत्र ते संति चत्वारो । मुक्ता गुप्तास्तदालये ॥
॥ ३६ ॥ ततो राज्ञि समायाते । प्रतिपत्तिः कृतानया ॥ परं भोजनसामग्रीं । नृपः प-
श्येन्न कामपि ॥ ३७ ॥

आकारितो भोजनार्थं । परिवारसमन्वितः ॥ विगोपनं विना मेऽत्र । किमेषा हा
करिष्यति ॥ ३८ ॥ इति चिंतयतो राज्ञ–स्तदा पुष्पादिभिस्तया ॥ गर्ताद्वारं पूजयित्वा
। प्रोचे रसवतीत्यभूत ॥ ३९ ॥ तेऽप्यूचुरन्नवत्सर्वा । ततोऽपवरकात्स्वयं ॥ निष्कास्य र-
सवतीं सा । भोजयामास भूपतिं ॥ ४० ॥ पुष्पतांबूलवस्त्राद्यैः । सेनया सहितो नृपः ॥
सत्कृतस्तच्छनं राज्ञे । सचिवात्तं च सार्पयत् ॥ ४१ ॥ तद् दृष्ट्वा विस्मितो राजा । चिंत-
यामासिवानिदं ॥ अदृष्टं दर्शयत्येषा–दृश्यं दृष्टं करोति च ॥ ४२ ॥ अस्या रूपं स्वरूपं
च । क्षमो वर्णयितुं हि कः ॥ यस्या वचनमात्रेण । सर्वं संपद्यते नवं ॥४३॥ ततः शी-
लवती पृष्ठा । तव का सिद्धिरस्ति भोः ॥ सा प्राह यक्षाश्चत्वारः । सिद्धा मे संति सर्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दा ॥ ४४ ॥ नृपोऽवग्देहि यक्षान्मे । यथा स्युश्चिंतितर्द्धयः ॥ तयोक्तं सुमुहूर्ते तान् । प्रेषयिष्ये भवद्गृहे ॥ ४५ ॥ गते राज्ञि द्वितीयेऽह्नि । तान्निष्कास्य च सा जलैः ॥ स्नपयित्वा चर्चयित्वा । चंदनाद्यैः स्रगादिभिः ॥ ४६ ॥ अर्चयित्वा करंडेषु । क्षिप्त्वा वादित्रपूर्वकं ॥ निनाय नृपतेः स्थानं । मानं चास्यै ददौ नृपः ॥ ४७ ॥

महानसे महानेष । राजा मोचयतिस्म तान् ॥ जनैरखंडश्रीखंडान् । करंडान् परया मुदा ॥ ४८ ॥ तस्मिन् दिने सूपकारा । राज्ञा रसवतीकृतौ ॥ निषिद्धा भोजनस्थाने । वेलायां गतवानयं ॥ ४९ ॥ कुसुमाद्यैरर्चयित्वा । करंडान् सोऽवदत्ततः ॥ अभूद्रसवती तेऽपि । प्रोचुरासीत्परं न सा ॥ ५० ॥ ततोऽसौ चिंतयामास । तस्या वाक्यवशात्तदा ॥ सर्वं यक्षैः प्रदत्तं मे । कथं यच्छंति नोऽधुना ॥ ५१ ॥ द्वाराण्यतः समुद्धाट्य । प्रत्यक्षं यक्षसन्निधौ ॥ पृच्छामि किमु तस्यै सा । दत्ता मह्यं तु नो पुनः ॥ ५२ ॥ तया कृते ततस्ते तु । राक्षसा इव निर्गताः ॥ अस्थिचर्मावशेषांगा । बीभत्साकारधारकाः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ५३ ॥ ततो राज्ञा जनाः प्रोक्ता । एतान् प्रत्यक्षराक्षसान् ॥ विनाशयत नो शीघ्रं । नाशयिष्यंत्यमी ध्रुवं ॥ ५४ ॥ तत् श्रुत्वा ते जयव्यग्रा । राजानं प्रोचिरे मृडु ॥ वयं नो राक्षसाः साक्षात् । किंतु कामांकुरादयः ॥ ५५॥ नृपतिर्विस्मितः प्राह । ह्यवस्था वः किमीदृशी ॥ तेऽवोचन् पूर्ववृत्तं तत । शीलवत्या विनिर्मितं ॥ ५६ ॥ आकार्य राजावोचत्तां । स्मितपूर्वकमुच्चकैः ॥ स्त्रियं यदबलां लोके । वदंति विबुधा अपि ॥ ५७ ॥ तत्त्वयात्र मृषा चक्रे । विजित्य सबलानमून् ॥ प्रायेण बुद्धिर्वामानां । न भवेत् सापि गीस्तथा ॥ ५८ ॥

संतोषपोषयुतया । वामबुद्धिस्वभावतः ॥ धनमात्तं यदेतेषां । तत्र किं कारणं वद ॥ ५९ ॥ सावदन्निर्धनानां य-द्वित्तं दत्तं त्वया घनं ॥ तेनैते दुर्मदा जाता । अनर्थसार्थगास्तथा ॥ ६० ॥ एतेषां तु मदं हर्तुं । शीलं धर्तुं तथात्मनः ॥ अनर्थमूलमर्थौघं । जगृहेऽहं स्वबुद्धितः ॥ ६१ ॥ तन्निशम्य नृपोऽवोच-दनर्थोऽयं मया कृतः ॥ अतो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ममापराधोऽयं । क्षंतव्यः स क्षमानिधे ॥ ६२ ॥ सा जगाद नराधीश । नापराधो ह्ययं तव ॥ सचिवानां तथा नैवे-दृशाः संसारिजंतवः ॥ ६३ ॥ ततः शीलवती राज्ञा । स्वसेव बहु मानिता ॥ सत्कृत्य वस्त्रालंकारैः । स्वगृहं प्रापिता तथा ॥ ६४ ॥ नृपतिप्रमुखे लोके । स्वस्वधर्मरतेऽन्यदा ॥ दमघोषाभिधः सूरि-र्भूरिसाधुः समाययौ ॥ ६५ ॥ भूपतिर्मत्रिणस्ते चा-जितसेनोऽपि मंत्रिराट् ॥ शीलवती सती सापि । वंदितुं श्रीगुरुं ययुः ॥ ॥ ६६ ॥ धर्मोपदेशे विशदे । गुरुणा विहिते हिते ॥ धर्माचार्यं नृपः प्राह । योजितांजलिकुड्मलः ॥ ६७ ॥ वामा शीलवती सेयं । कथं शीलवती स्वयं ॥ तथा बुद्धिमती बाढं । प्रमदा न मदान्विता ॥ ६८ ॥

गुरुर्जगौ पुरा राज-न्ननया शीलमाश्रितं ॥ अस्मिन्नपि भवे तेन । शीललीलामियं दधौ ॥ ६९ ॥ तन्निशम्य तयोर्जातं । जातिस्मरणमुच्चकैः ॥ यथा गुरुभिरादिष्टं । ताभ्यां दृष्टं तथा तदा ॥ ७० ॥ ज्ञानाभ्यां तु पुनस्ताभ्यां । ततो गुरुस्तंप्रति ॥ जगदे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जगदेकाग्र्य-धियं सुरगुरुप्रभं ॥ ७१ ॥ दीक्षां शिक्षातुलां देहि । यथा शीलं हि सर्वथा ॥ पालयावो नवब्रह्म-चर्यगुप्तिधरं परं ॥ ७२ ॥ गुरुणा दीक्षितौ तौ तु । नृपेणाथ तदा तथा ॥ कामांकुराद्यैः स्ववधू-संतोषव्रतमाददे ॥ ७३ ॥ पंचाचारविचारज्ञौ । तौ पंचसमितिं श्रितौ ॥ पंचमहाव्रतधरौ । पालयामासतुर्व्रतं ॥ ७४ ॥ विशेषतो ब्रह्मचर्यं । धृत्वा मृत्वा च तौ ततः ॥ ब्रह्माभिधं देवलोकं । गतौ ज्ञानान्वितौ सुखं ॥ ७५ ॥ अनुभूय सुखं तत्र । च्युत्वा प्राप्य च मानवं ॥ सर्वकर्मक्षयं कृत्वा । यास्यतो ब्रह्म शाश्वतं ॥७६॥ ये शीलमिद्धं परिपालयंति । विवेकिनः सत्वनिधत्तचित्ताः ॥ ते प्राप्य कीर्तिं परमां प्रतिष्ठां । स्वर्गापवर्गश्रियमाप्नुवंति ॥ ७७ ॥ इति महोपाध्यायश्रीधर्मसागरगणिशिष्यपंडित श्रीपद्मसागरगणिकृते शीलप्रकाशे शीलवतीप्रबंधे सप्तमः सर्गः समाप्तः ॥ श्रीरस्तु ॥ आ ग्रंथ श्रीजामनगरनिवासि पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीशीलप्रकाशः समाप्तः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only